येषां जीवानां कुत्रचिद्भवेत्। अशौचं तु त्र्यहं तेषां वज्रानलहतेषु च” आदि० पु० “वाराणस्यां म्रियते यः प्रत्याख्यातभिषक्क्रियः काष्ठपाषाणमध्यस्थो जाह्नवीजलमध्यगः। अविमुक्तोन्मुखस्तस्य कर्णमूलगतो हरः। प्रणवं तारकं ब्रूते नान्यथा कुत्रचित् क्वचित्” मात्स्ये, भारते च” न लोकवचनात्तात! न वेदवचनादपि मतिरुत्क्रमणीया ते प्रयागमरणं प्रति” अतएव विष्णुधर्मे रोग्यादिमरणमुक्तोक्तम् “यथायुगानुसारेण संत्यजेदात्मनस्तनुमिति” प्रयागादौ विशेषः त्रिस्थलीसेतौ स्कान्दे “यथा कथंचित्तीर्थेऽस्मिन् प्राणत्यागं करोति यः। तस्यात्मघातदोषो न प्राप्नुयादीप्सितान्यपि। पाद्मे विष्णुः “देहत्यागं तथा धीराः कुर्वन्ति मम सन्निधौ। मत्तनुं प्रविशन्त्येव न पुनर्जन्मने नराः” कौर्मे “व्याधितो यदि वा दीनः क्रुद्धोवापि भवेन्नरः। गङ्गायमुनमासाद्य यस्तु प्राणान् परित्यजेत् ईप्सितान् लभते कामान्वदन्ति मुनिपुङ्गवाः” तथा “या गतिर्योगयुक्तस्य सत्वस्थस्य मनीषिणः। सा गतिस्त्यजतः प्राणान् गङ्गायमुनसंगमे”। वाराहे “तत्र योमुञ्चति प्राणान् वटमूलेषु सुन्दरि! सर्वलोकानतिक्रम्य मम लोकं प्रपद्यते”। तथा “अकामोवासकामो वा वटमूलेषु सुन्दरि! शीघ्रं प्राणान्प्रमुञ्चेत यदीच्छेत्परमां गतिम्” तथा “पञ्चयोजनविस्तीर्णं प्रयागस्य तु मण्डले। व्यतीतान् पुरुषान् सप्त भविष्यांश्च चतुर्दश। नरस्तारयते सर्वान् यस्तु प्राणान्परित्यजेत्” ब्राह्मे “ध्यात्वा विष्णुपदाम्भोजं प्रयागे विष्णुतत्परः तनुन्त्यजति वै माघे तस्य मुक्तिर्न संशयः। दुष्कृतोऽपि दुराचारो ब्रह्महत्यादिपातकी। हरिं ध्यात्वा त्यजेद्देहं प्रायशो मुक्तिभाग्भवेत्” भविष्योत्तरे “समाः सहस्राणि तु सप्त वै जले दशैकमग्नौ पतने च षोडश। महाहवे षष्टिरशीति गोग्रहे अनाशने भारत! चाक्षया गतिः अग्निप्रवेशं ये कुर्युरविमुक्ते विधानतः प्रविशन्ति मुखन्ते मे निःसंदिग्धं वरानने! इति सामान्यतोऽपि फलमुक्तम् एवमन्येऽपि विषयोज्ञेयाः। एवं विहितमरणं तु कलौ निषिद्धमेव “भृग्वग्निमरणं चैव वृद्धादिमरणं तथेति माधवीये कलिवर्ज्येषूक्तेः यत्तु गौडाः प्रयागादिमरणं ब्राह्मणभिन्नविषयमित्याहुस्तत् त्रिस्थलीसेतुकृता दूषितं प्रागुक्तवचनात् “सर्वेन्द्रियवियुक्तस्य स्वव्यापाराक्षमस्य च प्रायश्चित्तमनुज्ञातमग्निपातो महापथः। धर्मार्जनासमर्थस्य कर्त्तुःपापाङ्कितस्य च। ब्राह्मणस्याप्यनुज्ञातं तीर्थे प्राणविमोक्षणमिति” हेमाद्रौ विवस्वदुक्तेश्च अपरार्के चैवमेव। सहगमनं कलौ भवत्येव “कलौ नान्या गतिः स्त्रीणां सहानुगमनादृत” इति ब्रह्मवैवर्त्तात् एतेन मरणान्तिकप्रायश्चित्तमपि व्याख्यातम् काशीखण्डादौ चातुर्वर्ण्यस्य तनुत्यागविधयस्तु युगान्तरपरा एव प्रयागेऽपि। अवैधात्मघाते तु “आत्मघातिनमुपक्रम्य” विहितं तस्य नाशौचं नाग्निर्नाप्युदकक्रियेति कू० पु० वचनात् नाशौचादि। तस्य च क्रियाकरणे चान्द्रायणद्वयसहितं वर्षिबधप्रायश्चित्तं नारायणबलिं च कृत्वा वत्सरादूर्द्ध्वं क्रिया कर्त्तुं शक्यते। वत्सरान्ते तु सर्वमौर्द्ध्वदेहिकं कुर्य्यात् इति हेमाद्रिप्रभृतयः। “गोब्राह्मणहतानाञ्च पतितानां तथैव च। ऊर्द्ध्वं संवत्सरात् कुर्य्यात्सर्वमेवौर्द्ध्वदेहिकमिति हेमाद्रौ षट्त्रिंशन्मतात्, ब्राह्मे “क्रियते पतितानान्तु गते संवत्सरे क्वचित् देशधर्मप्रमाणत्वाद्गयाकूपे स्वबन्धुभिः मातण्डपादमूले वा श्राद्धं हरिहरौ स्मरन्” स्वर्थपद इत्यर्थः तत्र वर्षमध्येऽपि कृत्यमुक्तमपरार्के वायुपुराणे “शुक्लपक्षे तु द्वादश्यां कुर्य्यात् श्राद्धन्तु वत्सरे। द्वादशाहनि वा कुर्याच्छुक्ले च प्रथमेऽहनि” छागलेयः “नारायणबलिः कार्योलोकगर्हाभयान्नरैः। तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः” व्यासः “नारायणं समुद्दिश्य शिवं वा यत्प्रदीयते। तस्य शुद्धिकरं कर्म तद्भवेन्न तदन्यथेति” स चात्मघातादिप्रायश्चित्तं कृत्वा कार्यः तदुक्तं हेमाद्रौ षट्त्रिंशन्मते “कृत्वा चान्द्रयणं पूर्व्वं क्रिया कार्या यथाविधि। नारायणबलिः कार्य्योलोकगर्हाभयान्नरैः। पिण्डोदकक्रियाः पश्चाद्वृषोत्सर्गादिकं च यत्। एकोद्दिष्टानि कुर्व्वीत सपिण्डीकरणं तथा। इन्द्रियैरपरित्यक्ता ये च मूढाविषादिनः। घातयन्ति स्वमात्मानञ्चाण्डालादिहताश्च ये। तेषां पुत्राश्च पौत्राश्च दयया समभिप्लुताः यथा श्राद्धं प्रतन्वन्ति विष्णुनामप्रतिष्ठितम् तथा ते संप्रवक्ष्यामि नमस्कृत्य स्वयम्भुवम्” इति हेमाद्रौ तेनैवोक्तेश्च तत्रैव बौधायनोऽपि “अथ नारायणबलिं व्यख्यास्यामोऽभिशस्तपतितमुरापात्मत्यागिनां ब्राह्मणहतानाञ्च द्वादशवर्षाणि त्रीणि वा कुर्वीतेति” गृह्यपरिशिष्टे तु चण्डालादीत्याद्युक्त्वा “दग्ध्वा शरीरं प्रेतस्य संस्थाप्यास्थीनि यत्नतः। प्रायश्चित्तं तु कर्त्तव्यं पुत्रैश्चान्द्रायणत्रयमित्युक्तम्। प्रमादमरणे तु न दोषः मदनरत्ने ब्राह्मे “प्रमादादपि निःशङ्कस्त्वकस्माद्विधिचोदितः चाण्डालैर्ब्राह्मणैश्चौरैर्निहतोयत्र कुत्रचित्। तस्य दाहादिकं कार्य्यं यस्मान्न पतितस्तु सः। चान्द्रायणं तप्तकृच्छ्रद्वयं तस्य विशुद्धये। यद्वा कृच्छ्रान् पञ्चदश कृत्वा